International Journal of Sanskrit Research 2019; 5(3): 127-130

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(3): 127-130
© 2019 IJSR
www.anantaajournal.com
Received: 16-03-2019
Accepted: 18-04-2019

**डा. प्रगतिदीक्षितः**
सहनिर्देशिका, सरस्वती
सरस्वती विहार, बरपदा, भद्रक, ओडिशा, भारत

**Correspondence**
**डा. प्रगतिदीक्षितः**
सहनिर्देशिका, सरस्वती
सरस्वती विहार, बरपदा, भद्रक, ओडिशा, भारत

# दर्शनेषु प्रातिभज्ञानविचारः

**डा. प्रगतिदीक्षितः**

**सारांशः**

संस्कृतवाङ्मये दर्शनानां स्थानमुन्नतं वर्तते। दर्शनानां सर्वेषामुद्देश्यं तु मोक्षप्राप्तिरेव, परं विचारसन्दर्भे भिन्न भिन्न मतं प्रदर्शयन्ति विभिन्नैः दार्शनिकैः। यथा वेदान्तैः जीवन्मुक्तिः जैनैः कैवल्यप्राप्तिः बौद्धैः निर्वाणप्राप्तिश्चेति उच्यन्ते। तादृश मोक्षप्राप्त्यर्थ्यं तु भिन्न भिन्नज्ञानसम्बन्धी विषये शास्त्रेषु चर्चा दृश्यते। यथा- यथार्थज्ञानम्, अयथार्थज्ञानम्, प्रातिभज्ञानमित्यादयः। प्रस्तुत पत्रेऽस्मिन् प्रातिभज्ञानस्य भिन्नेषु दर्शनेषु कीदृशविचारः सञ्जातः तस्य विषयस्योपस्थापनं क्रियते।

**कुट शब्दः** दर्शनेषु प्रातिभज्ञानविचारः

## प्रस्तावना

वेदादिशास्त्रेषु दर्शनशास्त्रस्य विचारः दरीदृश्यते सर्वत्र। अतः उच्यते-दृश्यते यथार्थरूपतया ज्ञायतेऽलौकिकोऽर्थः येन तत् दर्शनशास्त्रम्। अर्थात् जीवने दृश्यमानसमस्यानां समाधानार्थं यत् शास्त्रं पथं प्रदर्शयति तदेव दर्शनशास्त्रमित्युच्यते। दर्शनशास्त्रे जीव-आत्मा-ईश्वर-जगद्विषयकविचारः तथा च तेषां तत्त्वानामनुसन्धात्मिकाः पद्धतयः दृश्यन्ते। तेष्वेव भारतीयदर्शनं तत्त्वानामन्वेषणाय उद्दिष्टम्। सदित्यस्य पदार्थस्य अनुशीलनमेव दर्शनेषु सर्वदा दृश्यते। तत्त्वस्य साक्षात्कारो हि दर्शनमिति सर्वविदितम्। मनुना इत्थमुक्तम्-

सम्यक् दर्शनसम्पन्ना कर्मभिर्न निबध्यते।
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते॥

एतादृश दर्शनशास्त्रे प्रमाणानां विचारः मुख्यतया दृश्यते। यद्यपि प्रमाणविचारसन्दर्भे दर्शनशास्त्रेषु

विभिन्नमतानि परिदृश्यन्ते तथापि मुख्यरीत्या प्रत्यक्षानुमानोपमानशब्दानां सर्वत्र अङ्गीकारत्वाद् एतेषां प्राधान्यमेव स्वीक्रियते। तत्र आदौ उक्त प्रत्यक्षप्रमाणसन्दर्भे अत्र विचारः क्रियते।

ज्ञाननिरूपणावसरे प्रत्यक्षं निरूपितमेव। प्रत्यक्षज्ञानमेव हि एकः पदार्थो यस्मिन् सर्वेषां वादिनां सचार्वाकाणाम-विप्रतिपत्तिः। चार्वाका अपि प्रत्यक्षस्य प्रामाण्यं स्वीकुर्वन्ति। तस्यापि प्रामाण्यं सांव्यावहारिकमिति जैना माध्यमिका अद्वैतनश्च मन्यन्ते। प्रसिद्धानां प्रत्यक्षादिप्रमाणानां प्रामाण्यं व्यावहारिकमेवेति जैना मन्यन्ते।

**विषयोपस्थापना -**

पातञ्जलयोगसूत्रे योगजधर्मजन्योऽलौकिकज्ञानविशेष एव प्रातिभज्ञानमित्युच्यते। वैशेषिकदर्शने तदेव योगजज्ञान-मार्षज्ञानं वा प्रातिभमुक्तम्; अपरं तु लौकिकमपि प्रातिभज्ञानं यथार्थं स्वीकृतम्। तथाहि- पातञ्जले-'प्रातिभाद्वा सर्वम्' इति सूत्रव्याख्याने व्यासेनोक्तम् - प्रातिभं नाम तारकम्, तद्विवेकजस्य ज्ञानस्य पूर्वरूपम्, यथोदये प्रभा भास्करस्य, तेन वा सर्वमेव जानाति योगी प्रातिभस्य ज्ञानस्योत्पताविति [1]। व्यवहितविप्रकृष्टातीतानागतज्ञानं, श्रावणाद् दिव्यशब्दश्रवण[2]मित्यादि।

इदानीं तदेवास्मदादीनां प्रसिद्धं लौकिकप्रातिभज्ञानं निरूप्यते। तत्रोक्तं श्रीधरेण न्यायकन्दल्याम्-इन्द्रियलिङ्गाद्यभावे यदर्थप्रतिभानं सा प्रतिभा, प्रतिभवं प्रातिभमित्युच्यते तत्र भवद्भिरिति प्रातिभज्ञानस्य सामान्यलक्षणम्।

उक्तं च लौकिकस्य तस्यापि विवरणं प्रमाण्यं च जयन्तभट्टेन –

अपि चानगतं ज्ञानमस्मदादेरपि क्वचित्।
प्रमाणं प्रातिभं श्वो मे भ्राताऽगन्तेति दृश्यते॥
नानार्थजं न सन्दिग्धं न बाधविधुरीकृतम्।
न दृष्टं कारणं चेति प्रमाणमिदमिष्यताम्॥
क्वचित् बाधकयोगश्चेदस्तु तस्याप्रमाणता।
यत्रापरेद्युरभ्येति भ्राता तत्र किमुच्यताम्॥
काकतालीयमिति चेन्न प्रमाणप्रदर्शितम्।
वस्तु तत् काकतालीयमिति भवितुमर्हति॥ [3]

एवं जयन्तादिप्राचीनतार्किकैलौ किकप्रातिभज्ञानस्यापि बाधकाभावे प्रामाण्यं प्रत्यक्षत्वं च स्वीकृतम्। भविष्यदर्थस्य ज्ञानकालेऽविद्यमानत्वात् बहिरिन्द्रियसन्निकर्षाभावेऽपि मानस-प्रत्यक्षत्वमव्याहतम्। तथोक्तं जयन्तेन – नन्वनर्थजमिदं ज्ञानं भ्रातुस्तज्जनकस्य तदानीमसत्त्वात्। स्यादेतदेवं यदि तदाऽस्तित्वेन भ्रातरं गृह्णीयात्, किन्तु भाविनमेनं गृह्णाति, भावित्वं च तदस्यास्त्येवेति कथमनर्थजं तज्ज्ञानम्। ....... तद्देशसम्बन्धस्य तत्र प्रागभावो न तु धर्मिणः, स हि विद्यते एव प्रागभावतः स च कुतश्चित् भोजनात् कण्ठादेः कारणात् स्मरणपदवीमुपारूढः श्वस्तनागमनविशिष्टत्वेन प्रतिभातीति प्रातिभस्य स एव जनक इति। तस्मादनर्थजनत्वाभावात् प्रमाणं प्रातिभम्, प्रमाणं च सत् प्रत्यक्षमेव न प्रमाणान्तरम्, शब्द-लिङ्ग-सारूप्यनिमित्तानपेक्षत्वात्।

ननु प्रत्यक्षमपि मा मूदिन्द्रियानपेक्षत्वात्, मैवम्, मनस एव तत्रेन्द्रियत्वात्, पूर्वोत्पन्नचाक्षुषविज्ञानविशेषणस्य बाह्यस्य वस्तुनो मनो ग्राहकमिति नान्धद्यभाव इत्युक्तम्, शब्दाद्युपाया-न्तरविरतौ च जायमानमनवद्यं ज्ञानं मानसं प्रत्यक्षं भवति। ..... न च सिद्धदर्शनं प्रतिभा अस्मदादेरपि भावात्, तस्मान्न प्रामाणान्तरं प्रातिभम्, अपि तु प्रत्यक्षमेव[4]।

एवं तस्यावर्तमानविषयत्वात् प्रत्यक्षत्वाभावत्वमपि निराकृत्योपसंहृतं जयन्तभट्टेन – तस्मात् प्रत्यक्षमनागतग्राहि श्वो मे भ्राता आगन्तेति सिद्धम् [5]।

'प्रकारन्तरेण प्रतिभा वाक्यार्थरूपा भर्तृहरिणा वाक्यपदीये निरूपिता। तन्मते बाह्यार्थाभावेऽपि शब्दादेव अर्थप्रतिभा उत्पन्ना

1. यो -भा.सू.3.33
2. यो-भा.सू.3.36

1. न्यायमञ्जरी –p. I. p. 90 (chow)
2. न्यायमञ्जरी – p. I. p. 98-99 (chow)
3. न्यायमञ्जरी -p. I. p. 92 (chow)

सती अर्थस्फुरणात्मकेन तेनैव सर्व व्यवहार उपपद्यते। अतः प्रतिभामात्रं जगत् शब्दैविवर्त एव। तदुक्तं-

शब्दाष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी।
यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते॥ [6]

इयं तु प्रतिभा यद्यपि शब्देन जन्यते, तथापि अर्थजन्यत्वात् अर्थज्ञानजन्यत्वाद्वा न वाक्यार्थः अपि तु संस्कारानुयायिचित्तवृत्तिरूपा विजातीया बुद्धिरित्युक्तम्। इन्द्रियलिङ्गजन्यत्वाच्च प्रतिभा इत्यपि बोध्यम्।

इन्द्रियालिङ्गाद्यजन्यं प्रातिभज्ञानं यथार्थं न्यायसूत्र-भाष्यकारयोरपि सम्मतम्। उक्तं च वात्सायनेन – 'प्रातिभवत्तु प्रणिधानाद्यनपक्षे स्मार्त्ते यौगपद्यप्रसङ्गः इत्यादिभाष्ये – 'यत् खल्विदं प्रातिभमिव ज्ञानं प्रणिधानाद्यनपेक्षं स्मार्त्तमुत्पद्यते कदाचित् तस्य युगपदुत्पत्तिप्रसङ्गो हेत्वभावात्। ........ प्रातिभमिदानीं ज्ञानं युगपत्कस्मान्नोत्पद्यते? यथोपभोगार्थं कर्म युगपदुभोगं न करोति, एवं पुरुषकर्मविशेषः प्रतिभाहेतुर्न युगपदनेकं प्रातिभं ज्ञानमुत्पादयन्ती[7]त्यादि। पुरुषस्य शुमादृष्ट-विशेषैव प्रातिभज्ञानं यथार्थं जनयतीति दृष्टान्तविधयोक्तम्।

वैयाकरणमतं जयन्तेन न्यायमञ्जर्यामुल्लिखितं खण्डितं च। यद्यपि तत्संस्कारानुयायिविभिन्नचित्तवृत्तिरूपा प्रतिभा जायते, सा तु अर्थज्ञानजन्या एव न तु शब्दजन्या इति न वाक्यार्थः प्रतिभा भवितुमर्हतीति जयन्ताभिप्रायः।

तथोक्तं जयन्तेन –

प्रतिभा खलु विज्ञानं तच्च शब्देन जन्यते।
न तु शब्दस्य विषयो रूपाधीरिव चक्षुषः॥

बाह्यस्य विषयस्याभावात् सैव विषय इति चेन्न, तस्य (बाह्यार्थस्य) समर्थितत्वात्। योऽपि व्याघ्र आयाति इत्युक्ते शूर-कातर-नराधिकरणनानाप्रकारकार्योत्पादः स बाह्येऽर्थे व्याघ्रा-गमनादौ प्रतिपन्ने वासनानुसारेण भवन् न प्रतिभामात्रहेतुको (अर्थरहितज्ञानमात्रहेतुको) भवति, तस्य हि ज्ञायमानोऽर्थः कारणं तज्ज्ञानमात्रम्। अर्थस्तदानीं नास्तीति चेद् विप्रलम्भक-वाक्यमिदमसत्यार्थं भविष्यति, न त्वबाह्यविषयं तत्। यथा अवस्थिते वनितात्मनि बाह्यार्थे वासनारूपेण कुणप इति कामिनीति भक्ष्यमिति प्रतिभा भवन्ति, तथा शब्दार्थेऽपि व्याघ्रागमनेऽवगते शूराणात्साहः, कातराणां भयमित्यादिकार्यं भवति। न त्वेतावता प्रतिभा शब्दार्थो भवितुमर्हति।

उक्तं च तथैव प्रशस्तपादभाष्ये - .....आत्ममनसोः संयोगात् धर्मविशेषाच्च यत् प्रातिभं यथार्थनिवेदनं ज्ञानमुत्पद्यते तदार्षमित्याचक्षते। तत्तु प्रस्तारेण देवर्षीणाम् ; कदाचिदेव लौकिकानाम्, यथा कन्यका ब्रवीति- श्वो मे भ्राताऽऽगन्तेति हृदयं मे कथयति।

मीमांसकमते तु प्रातिभज्ञानं श्यामदृष्टवशेनोत्पन्नमपि न प्रमाणमर्थनिश्चायकत्वात्। तथाचोक्तं श्लोकवार्तिके कुमारिलभट्टैः-

लौकिकी प्रतिभा यद्वत् प्रत्यक्षाद्यनपेक्षिनी।
न निश्चयाय पर्याप्ता तथा स्याद्योगिनामपि॥ [8]

अतो यद्यपि न्याय-वैशेषिकमतयोः शुभादृष्टवशाज्जायमानं प्रातिभज्ञानं विषयाबाधे प्रमाज्ञानमेव मन-इन्द्रियरूपप्रमाण-जन्यत्वादबाधितत्वाच्च, तथापि मीमांसकादिमते न तत् प्रमा नापि प्रत्यक्षम्। क्वचित् प्रतिभायाः विषयाबाधेऽपि भूयशो विसंवादन्न प्रतिभा विषयनिश्चयिका भवति। विद्यमानसम्प्र-योगभावाच्च न प्रत्यक्षत्वम्।

अतो यद्यपि न्याय-वैशेषिकमतयोः शुभादृष्टवशाज् जायमानं प्रातिभज्ञानं विषयाबाधे प्रमाज्ञानमेव मनेन्द्रियरूप-प्रमाणजन्यत्वादबाधितत्वाच्च, तथापि मीमांसकादिमते न तत् प्रमा नापि प्रत्यक्षम्। क्वचित् प्रातिभायाः विषयासम्प्रयोगाभावाच्च न प्रत्यक्षत्वम्।

1. वाक्यपदीयम् -ब्रह्मकाण्ड-118 p. 92 (chow(

2. न्या .भा.3.2.34

1. श्लो -टी.वा.4.32

अद्वैतवेदान्तिना वाचस्पतिमिश्रेणापि प्रतिभाप्रत्ययस्य सन्दिग्धप्रामाण्यकत्वोक्त्या अप्रमात्वमेवोक्तम्। यथोक्तं भामत्यां भावनाधेयसाक्षात्कारस्याप्रामाण्योक्तिप्रसङ्गेन – ततो (ब्रह्मसाक्षात्कारात्) भिन्नस्य च भावनाधेयस्य साक्षात्कारस्य प्रतिभाप्रत्ययवत् संशयाक्रान्तया प्रामाण्यायोगात्। तद्विधस्य तत्सामग्रीकस्य बहुलं व्यभिचारोपलब्धेः। न खल्वनुमानविबुद्धं वह्निं साक्षात्कारः प्रमाणान्तरेण संवाद्यते। विसंवादस्य बहुलमुपलम्भात्[9] ।

अद्वैतमते यद्यपि लोकिकप्रातिभज्ञानानां प्रामाण्यमुक्तम्, तथापि योगजप्रत्यक्षाणामलौकिकानां संराधनजन्यब्रह्म-साक्षात्कारस्य [10] च प्रातिभज्ञानत्वं प्रामाण्यं चावश्यमेव स्वीकर्तव्यमिति ध्येयम्। साक्षिप्रत्यक्षमपि इन्द्रियव्याप्तिज्ञानाद्य-जन्यत्वात् प्रातिभज्ञानमेव यथार्थम्।

रामानुजीयानां मते तु भूतविवास्तुसाक्षात्काररूपायाः प्रतिभायाः प्रत्यक्षऽन्तर्भूतत्वत्वात् यथार्थत्वमेव। उक्तं हि – "पुण्यपुरुषनिष्ठा प्रतिभाऽपि प्रत्यक्षेऽन्तर्भूता[11]"।

जैनमतेऽपि तत्त्वार्थवृत्तौ भास्करनन्दिनोक्तं – "तेनैव प्रकारा एवमादिर्वा या प्रतीतिः सा सर्वा संगृहिता भवतीति। सा च प्रतिभा बुद्धिमेधाप्रज्ञादिः। एतेन मतिज्ञानान्तर्भूतं यथार्थज्ञानमेव सांख्यवहायिकं प्रतिभा इति सूचितम्। तन्मतसिद्धान्य-वधिमनःपर्यायकेवलज्ञानान्यपि योगजत्वात् प्रतिभान्येवेति स्वीकर्तव्यम्।

## उपसंहारः

अत्रेदं चिन्तनीयम् – यद्यपि सर्वे दार्शनिकाः कण्ठतः योगजप्रत्यक्षाणि प्रातिभज्ञाने नान्तर्भावयन्ति, तथापि तानि सांख्य-पातञ्जल- वैशेषिक- जैन- बौद्ध- वेदान्तसम्मतानि फलतः प्रातिभज्ञानान्येव, इन्द्रियलिङ्गाद्यभावेऽपि साक्षात्कारिज्ञानत्वात् लौकिकप्रातिभज्ञानवदिति। अत एव पातञ्जला वैशेषिकाश्च योगजप्रत्यक्षानि प्रातिभानीति वदन्ति। तथाऽद्वैतवेदान्तसम्मतं साक्षिप्रत्यक्षमपीन्द्रियलिङ्गाद्यजन्यापरोक्षज्ञानरूपत्वात्। प्रातिभज्ञानमेवेति सूक्ष्ममीक्षनीयम्। एतदपि योगजं प्रातिभज्ञानं प्रमाणमेवेति वैशेषिकादिमतानुसारेण बोध्यम्। प्रातिभस्याप्रामाण्यवादिमीमांसकादिमतेन तु नैतदेवमिति स्पष्टम्॥

## सन्दर्भग्रन्थसूची


1. अर्वाचीनमनोविज्ञानम् - श्रीमामराजदत्तकपिलः, सम्पूर्णानन्दग्रन्थमाला, वारणासी, (1883)
2. प्राचीनभारतीयमनोविद्या – श्री दिनेशचन्द्र शास्त्री, नागान्द्रप्रज्ञामन्दिर, कलिकता (1972)
3. न्यायमञ्जरी – जयन्तभट्टः, चौखम्बा संस्कृत संस्थान, वारणासी, (1998)
4. ब्रह्मसूत्रशाङ्करभाष्यम् – (एकादशटीकासंयुतम्) अनुवादकः – प्रो. योगेश्वरदत्तशर्मा (पाराशरः), नाग प्रकाशक, दिल्ली, 2011
5. न्यायभाष्यम् – आचार्यः वात्सायानः [न्यायदर्शनम् (वात्सायानीयभाष्यसहितम्)] सम्पादकः डा. महेश झा, चौखम्बा संस्कृत सीरीज अफिस, वारणासी, (2013)
6. योगसूत्रभाष्यम् – व्यासभाष्य-संवलितम् तच्च योगसिद्धि – हिन्दीव्याख्योपेतम्, व्याख्याकार – डा. सुरेशचन्द्र श्रीनिवास्तव, चौखम्बा सुरभारती प्रकाशन, वारणासी, (2015)
7. भामती – ब्रह्मसूत्रशाङ्करभाष्यम्, आचार्यः वाचस्पतिमिश्रः
8. श्लोकवार्तिकटीका – सुचित्रा मिश्र, आनन्द आश्रम
9. यतीन्द्रियमतदीपिका – श्रीनिवास, आनन्द आश्रम
10. प्रशस्तपादभाष्यम् – आचार्यः प्रशस्तपादः,वारणासी संस्कृत विश्वविद्यालयः, वारणासी।
11. वाक्यपदीयम्-ब्रह्मकाण्ड – भर्तृहरिणा विरचित, चौखम्बा संस्कृत प्रकाशनम्, वारणासी।


---

1. भामती –1.1.1
2. ब्र.सू.शा -.भा.3.2.24
3. यतीन्द्रियमतदीपिका – p.8 (by Vasudeva Sastri, Ananda Asram)